International Journal of Sanskrit Research 2016; 2(1): 59-61

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(1): 59-61
© 2016 IJSR
www.sanskritjournal.com
Received: 25-11-2015
Accepted: 27-12-2015

**डा0 त्रिभुबननारायण मिश्र**
भीड़हा, समस्तीपुर, बिहार, भारत

**Corresponding Author:**
**डा0 त्रिभुबननारायण मिश्र**
भीड़हा, समस्तीपुर, बिहार, भारत

# महर्षियास्कस्य काव्यशास्त्रीयदार्शनिकदृष्टिश्च

## डा0 त्रिभुबननारायण मिश्र

**प्रस्तावना**

वैज्ञानिक–चाकचिक्येन चकिताश्चमत्कृताश्च अधुनातना जना न जानन्ति न वा स्वीकुर्वन्ति प्राचीनानां महर्षीणाम् आध्यात्मिकं वैभवम्ख्य वैदुष्यं वैशिष्ट्य×च। आस्माकीनाः प्राचीना महर्षयः मन्त्र–द्रष्टारः सन्तः विश्वेषां पदार्थानां याथातथ्यं जानाना आसन्। ऋषिशब्दस्य निर्वचनं कुर्वता महर्षियास्केन ''ऋषिर्दर्शनात्'' इति प्रतिपाद्य 'स्तोमान् (मन्त्रान्) ददर्श (पश्यति) ऋषिरिति' औपमन्यवाचार्यमतमपि प्रदर्शया×चक्रे [1]। एतस्मिन्नर्थे ''तद् यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भु अभ्यानर्षत्, त ऋषयोऽभवन् तद्ऋषीणामृषित्वमिति विज्ञायते'' [2] इति ब्राह्मणमपि प्रादर्शि। अर्थात् यस्मात् तपस्तप्यमानान् एतान् ऋषीन् ऋग्यजुःसामाख्यं स्वयम्भु ब्रह्म अभ्यागच्छत्। (तपोविशेषेण अनधीतमेव वेदम् ते तत्त्वतो ददृशुः ज्ञातवन्त इति भावः) ते खलु ऋषयोऽभवन् तद् ऋषीणाम् ऋषित्वमित्येवं ब्राह्मणेऽपि विचार्यमाणं सत् ज्ञायते। एतेन ऋषयः सूक्ष्मानपि आधिभौतिकान्, आधिदैविकान् आध्यात्मिकांश्च पदार्थान् हस्तामलकवत् पश्यन्तीति अवगम्यते।

आधुनिक–प्राकृत वैज्ञानिक–दृष्ट्यापि महर्षि–यास्कस्य महत्त्वाधायकं वैज्ञानिकत्वं तन्निरुक्ते विलोक्यते। तथा हि–वैश्वानरस्याग्नेः विचारणायाम् पार्थिवोऽग्निः वैश्वानरः उताहो वैद्युतः, आदित्यो वेति प्रश्ने ''अयमेव पार्थिवोऽग्निः वैश्वानरः'' [3] इत्याचार्यशाकपूणिमतं समर्थयता महर्षियास्केन प्रतिपादितम्–

''विश्वानरौ एते उत्तरे ज्योतिषी। वैस्वानरोऽयं यत् ताभ्यां जायते'' इति। अर्थात् वैद्युतरूपं मध्यमम्, आदित्यरूपमुत्तम×च इमे उभे ज्योतिषी विश्वानरौ उच्येते। अयं हि पार्थिवः अग्निः यत5 ताभ्यां मध्यमोत्तमाभ्यां वैद्युतादित्यरूपाभ्यां विश्वानराभ्यां ज्योतिर्भ्याम् जायते, अतः तयोरपत्यत्वाद् वैश्वानर इति निगद्यते।

कथमयं पार्थिवोऽग्निः एताभ्यां ज्योतिर्भ्यां जायते इति जिज्ञासां समादधता तेन तत्रैव प्रतिपादितम्–

''यत्र वैद्युतः शरणमभिहन्ति। यावदनुपात्तो भवति मध्यमधर्मैव तावद् भवति, उदकेन्धनः शरीरोपशमनः। उपादीयमान एवायं संपद्यते उदकोपशमनः शरीरदीप्ति [4]'' रिति।

अयमाशयः – यावत्कालपर्यन्तं वैद्युतः अग्निः शरणम्–आश्रयरूपं जलं प्राप्नोति, यावच्च मनुष्यैरस्पृष्टो भवति तावदयं मध्यम [5] धर्मा भवति, अर्थात् उदकेन दीप्यते, शरीरेण शुष्ककाष्ठेन अन्येन वा प्रतिहतमूर्तिस्वभावकेन उपशाम्यतिं यदा चायं मध्यमो वैद्युतोऽग्निः परिगृह्यते तदैव पार्थिवोऽग्निः संपद्यते, अर्थात् जलेन उपशाम्यति शरीरेण काष्ठादिना च प्रदीप्यते। अत्र जलाज् जायमानायाः काष्ठादि–सम्पर्कोपशमशीलायाश्च विद्युतः स्वभावः–यदधुना वैज्ञानिकप्रयोगेण प्रदर्श्यते–महर्षिणा तदानीन्तने एव काले साधु प्रतिपादितः।

विश्वानरादादित्यरूपादपि अयं पार्थिवोऽग्निर्वैश्वानरः समुत्पद्यते इति प्रतिपादयता महर्षिणा यास्केन कथितम्–''उदीचि प्रथमसमावृत्ते आदित्ये, कंसं वा मणिं वा परिमृज्य प्रतिस्वरे, यत्र शुष्कगोमयम् असंस्पर्शयन् धारयति तत् प्रदीप्यते। सोऽयमेव संपद्यते'' [6] इति। अयं भावः –

ग्रीष्मसमये यदा आदित्यः प्रखरकिरणो भवति तदा कांस्यपात्रं सूर्यकान्तमणिं वा परिशोध्य आतपे यदि स्थापयति, तदधोभागे शुष्कगोमयम् असंस्पर्शयन् धारयति, तदा तद्गोमयं प्रदीप्यते। सः शुष्कगोमयजन्मा अयं पार्थिवः अग्निः संपद्यते। अत्र महर्षियास्कस्य वैज्ञानिकदृष्टेः प्रयोगोऽपि सुस्पष्टं दृश्यते। एतेन उपर्युक्त वैश्वानरविषयकप्रतिपादनेन महर्षेर्वैज्ञानिकता कमपि महिमानमादधाति।

आध्यात्मिकोन्नत्यै प्रयतमानानां प्राचीनानां महर्षीणाम् आधिभौतिकोन्नतौ हेयज्ञानतया आधिभौतिकविाने न तथा तेषामाभिनिवेश इति जानत एव विवेकिनो विपश्चितः।

वेद–वेदाङ्गानां सम्यगध्येतारः महर्षीणां दर्शनेषु कृतिषु आधुनिकविज्ञान–प्रतिपादितान् विषयान् अवलोकयन्ति निर्दिशन्ति च जिज्ञासूनां जिज्ञासासमाधानाय, ज्ञानार्थिनां ज्ञानवर्द्धनायेतिशम्।

भगवद्गीतोक्त–ज्ञान–विज्ञान–विमर्शः –

श्रीमद्भगवद्गीतायां ज्ञान–विज्ञान–शब्दयोः विभिन्नप्रसङ्गेषु बहुशः पृथक् प्रयोगा दृश्यन्ते। अधोलिखितेषु चतुर्षु स्थलेषु तु उभयोः सहप्रयोगाः प्राप्यन्ते। तथा हि–

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।। [7]

अत्र इन्द्रियनियमनपूर्वक–पाप–परित्यागोपदेशः विधीयते। यतो हि पापः ज्ञान–विज्ञान–विनाशकोऽस्ति, अतः पापस्य परित्यागः परमावश्यकः। अत्र ज्ञानशब्दार्थः शास्त्रतः आचार्यतश्च आत्मादीनामवबोधः तथा विज्ञानशब्दस्य विशेषतस्तदनुभव इत्यर्थः। अत्र ज्ञानस्य ''सत्यं ज्ञानमनन्तं ब्रह्म'', विज्ञानस्य ''विज्ञानमानन्दं ब्रह्म'' इत्यादि रूपोऽर्थः कर्तुं नैव शक्यते, पापद्वारा तादृशोर्ज्ञानविज्ञानयोर्नाशासम्भवात्।

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः।।

इत्यत्र ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानम्, विज्ञानम् शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणम्, ताभ्यां तृप्त आत्मा अन्तःकरणं यस्य स ज्ञान–विज्ञानतृप्तात्मा इत्यर्थो भवति।

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज् ज्ञातव्यमवशिष्यते।। [8]

अत्र ज्ञानं परमात्मविषयकं ज्ञानम्, सविज्ञानं विज्ञानसहितम्, स्वानुभवसंयुक्तम्, कात्स्न्र्येन एतत्कथनमपेक्षितम्, यतः तज् ज्ञानं परिज्ञाय पुनः किमपि ज्ञातव्यम् पुरुषार्थ–साधनं नावशिष्यते। यो हि परमात्मतत्त्वज्ञो भवति स सर्वज्ञो भवतीति तात्पर्यम्।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।। [9]

अत्र ''वासुदेवः सर्वमिति'', ''आत्मैवेदं सर्वमि''त्यादिरूपमेव विज्ञानसहितम् अनुभवयुक्तम् ज्ञानम् गुह्यतमं सम्यग्ज्ञानं विवक्षितम्। यज् ज्ञानं विज्ञाय मानवः अशुभात् संसार–बन्धनाद् विमुक्तो भवति। ज्ञान–विज्ञानयोगात्मके सप्तमेऽध्याये, राजविद्याराजगुह्ययोगात्मके च नवमेऽध्याये उपर्युक्तस्थलयोः भगवान् 'ज्ञानविज्ञानस्वरूपं कथयिष्यामीति, समुद्घोषयन् तत्र त्रयोदशाध्याये–

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा।। [10]

इति प्रत्यपादयत्। अयं भावः–
आत्मानम् अधिकृत्य प्रवृत्तम्– आत्मानात्म– विवेकज्ञानम्–अध्यात्मज्ञानम्, तत्र नित्यत्वम् = तस्मिन्नेव निष्ठावत्त्वम्। तत्त्वज्ञानस्य–'सर्वं खलु इदं ब्रह्म' तस्य नाम 'तत्' तस्य ब्रह्मणो भावो याथात्म्यं, तस्य ज्ञानम् तत्त्वज्ञानम्, 'सत्यं ज्ञानमनन्तं ब्रह्म' 'एकमेवाद्वितीयं ब्रह्म' इत्यादिरूपम्। तस्य तत्त्वज्ञानस्य अर्थ–प्रयोजनं–मोक्षः, तस्य दर्शनम् आलोचनम् इत्येतद्रूपं ज्ञानं स्पष्टं प्रतिपादितमस्ति। तत्रैव–अमानित्वम्, अदम्भित्वम्, अहिंसा, क्षान्तिः, आर्जवम्, आचार्योपासनम्, शौचम्, स्थैर्यम्, आत्मविनिग्रहः, इन्द्रियार्थेषु वैराग्यम्, अनहंकारः, जन्म–मृत्यु– जरा– व्याधि–दुःख–दोषानुदर्शनम्, असक्तिः, पुत्रदारगृहादिषु अनभिष्वङ्गः, इष्टानिष्टोपपत्तिषु नित्यं समचित्तत्वम्, परमात्मनि अनन्ययोगेन अव्यभिचारिणी भक्तिः, विविक्तदेशसेवित्वम्, जनसंसदि अरतिः [11] इत्यादि सम्यग्ज्ञानसाधनान्यपि ज्ञानपदेन विवक्षितानि। एवमेव श्रीमद्भागवतमहापुराणेऽपि प्रतिपादितम्–''तद्विजानीहि यज् ज्ञानमात्मतत्त्वं निदर्शनम्'' इति।
एवं हि भगवान् यथा कण्ठरवेण ज्ञानस्वरूपं प्रतिपादयामास न तथा विज्ञानस्वरूपम्। अतो विज्ञानविषयकजिज्ञासा जागर्तितराम्।

'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्'
इति रीत्या व्याख्यानतो गीताया विज्ञानं विज्ञायते।
'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः'

इति व्याचक्षाणैराचार्यैः ज्ञानम् = आत्मज्ञानम्, अव्यक्तस्वरूपज्ञानम्, तथा विज्ञानम् = विविधसृष्टिज्ञानम्, व्यक्तस्वरूपज्ञानमिति प्रतिपाद्यते। आत्मतत्त्वस्य अव्यक्तस्य ज्ञानार्थम् व्यक्तस्य ज्ञानमावश्यकम् भवति, अत एव भगवता सविज्ञानं ज्ञानं प्रतिपाद्यते। अयामाशयः भगवतो निर्गुणनिराकारतत्त्वस्य प्रभावमाहात्म्यादेर्यथार्थज्ञानम्–'ज्ञानम्' तथा सगुणसाकारतत्त्वस्य प्रभावमाहात्म्यादेर्यथार्थज्ञानम् [12] 'विज्ञानम्'।
अक्षरस्य तस्मादप्युत्तमस्य पुरुषोत्तमस्य [13] यज् ज्ञानम् तज् 'ज्ञानम्' तथा क्षरस्य यज् ज्ञानम् तद 'विज्ञान'मित्यर्थः। पुरुषोत्तमस्य समग्ररूपस्य परिज्ञानाय उभयोः ज्ञानविज्ञानयोर्ज्ञानमावश्यकमिति तत्र द्वयोः प्रतिपादनम्। अत एव एतत्प्रसङ्गे सप्तमाध्याये ''भूमिरापोऽनले वायु'' रित्यादिना विज्ञानसाधनीभूतानां प्रकृति–स्वरूपाणां प्रतिपादनं कृतं भगवता।
अयमेव विषयः मुण्डकोपनिषदि प्रकारान्तरेण प्रतिपादितोऽस्ति। महाशाला शौनकः महर्षिम् अङ्गिरसं पप्रच्छ–''कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञानं भवतीति'' [14]।। महर्षिरङ्गिरा उवाच–''द्वे विधे वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति। परा चैवापरा चेति। तत्र अपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते। [15] अत्रत्या 'परा' विद्या एव गीताया 'ज्ञानम्' तथा 'अपरा' विद्या 'विज्ञानम्'। अपरारुपेण विज्ञानेन क्षरस्य परारूपेण ज्ञानेन च अक्षरस्याधिगम इत्युपनिषदो [16] रहस्यम्।

इदमेव तत्त्वं श्वेताश्वतरोपनिषदि 'क्षरन्त्वविद्या ह्यमृतं तु विद्येत्यादि [17]' रूपेण प्रतिपादितम्।

इदमेव रहस्यम् ईशावास्योपनिषदि समुद्घाट्यते ज्ञानस्य–यथार्थज्ञानस्य–सर्वोत्तमं फलं विद्यया प्राप्यते तथा कर्मणः–सत्कर्मणः सर्वोत्तमं फलम् अविद्यया लभ्यते। अतो विद्यया अमृतत्व–पानाय अविद्यया च मृत्युतरणाय सहैव उभयोर्ज्ञानमावश्यकम्।
एतावता– मुण्डकोपनिषदः परविद्या अपराविद्या ईशावास्योपनिषदः विद्या अविद्या श्वेताश्वतरोपनिषदः अमृतन्तु विद्या क्षरन्तु अविद्या एव गीतायाः ज्ञानम् विज्ञानञ्च।

एनयोरुभयोर्ज्ञानादेव ज्ञाने परिपूर्णत्वं जायते।

विज्ञानस्य कार्यं महत्त्वञ्च तैत्तिरीयोपनिषदि प्रतिपादितं वर्तते। तद्यथा–विज्ञानं यज्ञां तनुते कर्माणि तनुतेऽपि च अर्थात् विज्ञानमेव यज्ञं शुभकर्मरूपं पुण्यं तनुते विस्तारयति। विज्ञानमेव च लौकिककर्माणि तनुते। विज्ञानेनैव शरीरे पाप्मनो हित्वा सर्वानृ कामान् समश्नुते जीवः।
श्रीमद्भागवतेऽपि यत्र तत्र ज्ञान–विज्ञानयोरेतस्मिन्नेवार्थे प्रयोगो दरीदृश्यते। अयमेवार्थः प्रकारान्तरेण अमरकोशे प्रतिपाद्यते–

मोक्षेधीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।

अयमत्र निष्कर्षः –गीतायाम् –परमात्मपुरुषोत्तमविषयकं सम्यग्ज्ञानम्–'ज्ञानम्' प्रकृत्यात्मकं विशिष्टं ज्ञानम् 'विज्ञानम्'। उभयोर्ज्ञानविाानयोर्ज्ञानादेव परमपुरुषार्थ–सिद्धिर्भवतीति शम्।

**सन्दर्भा**


1. निरुक्ते–2/3/12।
2. तत्रैव उद्धृतम्।
3. तत्रैव 7/6/23।

4. तत्रैव 7/6/23।
5. मध्यमस्येव धर्मो यस्येति व्यधिकरण–बहुव्रीहौ अनिच्।
6. तत्रैव–7/6/23।
7. गीता–3/41।
8. तत्रैव–7/2।
9. तत्रैव–9/1।
10. तत्रैव–13/11।
11. तत्रैव–13/7–10।
12. श्रीमद्भाग0 2/5/1।
13. यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
    अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।। गीता 15/18।
14. मुण्डकोप0–1/3।
15. तत्रैव–1/5।
16. मुण्डक–गीतारूपयोः।
17. द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे।
    क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविधे ईशते यस्तु सोऽन्यः।।
    –श्वेताश्व0–5/1।